श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ आचार्यद्वात्रिंशत् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font. Our sincere thanks to Sri. Sundar Varadarajan of Chennai for proofreading this text.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ आचार्यद्वात्रिंशत् ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीकोशं ज्ञानमुद्रां करसरसिजयोर्बिभ्रदत्यन्तरुच्या
तिष्ठन् पद्मासने यस्स नलिनतुलसीमालिको वेङ्कटेशः।
वेदान्ताचार्यवर्यः कविकथकघटाकेसरी सर्वतन्त्र
स्वातन्त्र्य श्रीमदात्मा सकरुणनयनस्सन्निधत्तां सदा मे॥ १ ॥

मानार्हं महतां मलीमसधियां वैदेशिकं देशिकं
वन्देऽहं सततं यदीयमतुलं श्रीमानितीमं मनुम्।
पूर्वाचार्यकृतीः कलौ भुवि नृणां ब्रूहीति संपृच्छते
राज्ञे श्रीश उपादिशद्वृषगिरौ श्रेयः प्रदोऽसाविति॥ २ ॥

वेङ्कं वेदशिरोगुरोः पदयुगाम्भोजं सदा भावये
निस्सौहित्यसुधात्मकं विमलधीसन्दायकं ज्ञानिनाम्।
यल्लाभार्थमनन्तसूरिमतुलं स्वप्ने वृषाद्रीश्वरो
वैश्वामित्रजमाजुहाव सरमो घण्टाप्रदानोत्सुकः॥ ३ ॥

कञ्जस्याङ्घ्रियुगस्य पत्रसमतां प्राप्ताङ्गुलीनां ततिः
श्री वेदान्तगुरूत्तमस्य सततं चित्ते लसेन्मामके।
यं लब्धुं वृषभूमिभृत्पतिहरेः घण्टामयं प्रापिता
गर्भं द्वादशभिर्बभार जननी तोता शुभैर्हायनैः॥ ४ ॥

टङ्कं यद्वृजिनोपलस्य निगमान्तार्यस्य पादाम्बुजं
वज्रच्छत्ररथध्वजामृतघटाद्यामण्डितं भावये।
यो वर्षे विभवे नभस्य उदितः काञ्च्यां शुभे विष्णुभे
भ्राजत्यस्मदभीष्टदो वृषगिरिश्रीशस्य तीर्थोत्सवे॥ ५ ॥

www.prapatti.com

नाथोऽहं कविवादिकेसरिगुरोर्जङ्घायुगं श्रेयसो
गत्यै श्रीशकलाचिकेषुधिवर श्रीकाहलीसन्निभम्।
यो रामानुजसूदपौत्रदुहितुस्सूनुर्भवत्यद्भुतः
श्रीरामानुजवादिहंसजलभृन्नाम्नो गुरोस्स स्वसुः॥ ६॥

थाभाकान्तिमुरोजविभ्रमनिभं जानुद्वयं संस्मरा-
म्यात्मज्ञानददर्पणं पदजुषामाम्नायचूडागुरोः।
यो बालोऽपि स मातुलो वरदगुर्वाख्यस्य मोदावहो
ज्ञानात्तेन ततो व्यलोकि कृपया साशीर्वचोऽनुग्रहम्॥ ७॥

आर्यो वेदशिरोगुरोस्सुनियमोह्यूरुद्वयं संस्तुव-
न्न्यास श्रीकुशलाभिषेचनकृतस्तद्धस्तिनो हस्तभम्।
यः पित्रा कृतजातकर्ममुखसत्कर्मोपनीतस्तथा
साङ्गाध्याय उपावहत्स दयितां प्रापाथ कामान् स्वकान्॥ ८॥

कल्याणं स्मरणाद्दिशेन्मम कटीदेशस्त्रयीमस्तका-
चार्यस्यामलकोमलाद्रिरुचिरः श्रीवाससा वेष्टितः।
विंशत्यब्द उपागमत्तु निखिला विद्यास्सकाशाद्गुरोः
वेदान्तान्निजमातुलस्य निखिलान् योऽयं रहस्यान्यपि॥ ९॥

विश्वासं दिशतान्महान्तमिह मे वेदान्तसूरेः कटी-
देशस्योपरिभाग इन्दुधवलस्वादूत्तरीयोज्ज्वलः।
यः काञ्च्यां कमलापतिं च वरदं संसेव्य नित्यं स्तवान्
शिष्येभ्योऽभिमतप्रदो व्यतनुत प्रीत्या लसद्दर्शनः॥ १०॥

तारार्थं विशदीकरोतु निगमान्तार्यस्य नाभिः पयो-
धेरावर्तसमद्युतिर्भुजगराट्छ्रीपत्तने वीशितुः।
कारुण्याप्तहयाननस्सुरपतेराज्ञावशाद्यः स्तुतीः
पञ्चाशत् प्रभृतीरपीतरनुतीर्दुर्वादिहन्ताऽकरोत्॥ ११॥

किं तस्योदरबन्धनो मम धियस्सद्गोचरो राजते
सत्रैकालिकबुद्धिसूचकवलिश्रेण्या ततो निर्गतः।

स्तुत्वा गोपपुरीपतिं च वरदं दीपप्रकाशादिकान्
पञ्चाशत् प्रमुखान् प्रबन्धनिकरानन्यांश्च यो निर्ममे॥ १२॥

कर्तव्यं विमलं करोतु करुणामावर्षतस्तस्य म-
य्याम्नायान्तगुरोर्मनः प्रपदने मूर्धाभिषिक्तं बुधैः।
यः कौबेरदिशं प्रपद्य घटिकाद्रीशं स्तुवन् वेङ्कट-
क्ष्माभृच्छ्री शमथाभिगम्य करुणास्तोत्रं शतं चाकरोत्॥ १३॥

केचिच्छ्रीशकृपां परे तु जगदुर्ज्ञानं निदानं गते-
राम्नायान्तगुरोर्वयं तु सुकृपां चेतोऽर्थयामोऽनिशम्।
योऽसावुत्तरदेशभासुरहरीन्नाथान्निषेव्यादरात्
विद्यारण्यमथाजयत्तृणवसुः काञ्चीप्रदेशे पुनः॥ १४॥

सन्तोषं प्रददातु मेऽस्य सद्गुरो वैराग्यमार्गे सदा-
ब्जाक्ष श्री तुलसीपवित्र विलसन्मालाभिरामोदरम्।
श्रीरङ्गे परवादिशास्तिविधये सेनेशिता शासनं
दत्त्वा स प्रजिघाय यस्य निकटे कैश्चिद्बुधैः प्रार्थितः॥ १५॥

रीणत्वं नियमे हतां मदुचिते श्रीशङ्खचक्रे गुरोः
बाह्वोर्मूलसुचिह्निते श्रुतिशिरश्चूडार्यनाम्नश्शुभे।
यः श्रीरङ्गनिधेर्विधाय नितरां श्रीमङ्गलाशासनं
भट्टार्यक्रमतोऽन्यवादिन मथो जित्वा तथा निर्ममे॥ १६॥

वेदान्तं विशदीकरोतु मम तद्व्याख्यानमुद्राकरः
प्रज्ञास्वर्द्रुमपल्लवः श्रितसुधीवर्गे घटीयन्त्रभः।
यो द्रागीशत आगमान्तगुरुतामागादुपन्यस्य यो
रङ्गेशाद्रमया च तां निखिलसत्तन्त्रस्वतन्त्राभिधाम्॥ १७॥

दाम्नो मोचयताद्भवात्सपदि मां श्रुत्यन्तसूरेः करः
प्रज्ञावारिधिविद्रुमारुणघृणिस्सत्पुस्तको यः पुरा।
अस्तोकाहवकृष्णमिश्रमजयत्सङ्कल्पसूर्योदयात्
त्रिंशद्वारवितीर्णभाष्यमददात्काव्याञ्जयड्डिण्डिमान्॥ १८॥

तान्तं मामरिभिस्सदाक्षनिवहैराश्वासयेत् स्वोक्तिभिः
तत्कण्ठश्शरणागतं विमलसच्छङ्खच्छविर्भासुरः।
यस्संसेव्य च दाक्षिणात्यभगवद्देहान्छठद्वेषिणं
चोल श्रीरमणान् गतोऽगमदथो काञ्चीं ददत्सद्धिकाम्॥ १९ ॥

चारित्रं विमलं ददातु मम तद्वक्त्रं सरोजोपमं
रम्याक्षि श्रुतिनासिकास्मितलसत्सुभ्रूर्ध्वपुण्ड्रादिकम्।
यः कल्यन्तु नरेन्द्रगर्वशमनः श्री वेङ्कटाद्रीश्वरं
संसेव्याथ विचित्रवाजिवदनः श्रीरङ्गमागात्पुनः॥ २० ॥

यत्युत्तंसमतेऽद्य मां तदधरस्सम्यक् प्रतिष्ठापयेत्
बिम्बादेरधरत्वदो द्वयमनोरुच्चारणात्संस्फुरन्।
तत्तद्देशनिवासिनामभिमतैर्ग्रन्थैर्मुदं योऽदिशत्
नित्याचारपरोऽकरोद्वरगुरून् हस्तीशमुख्यान् सतः॥ २१ ॥

वर्गे मां दुरितस्य हिंसनकृतो मुह्यन्तमाश्वासयेत्
तन्ना साश्वसितैस्सरोजसुरभिश्चांपेयसूनाकृतिः।
बिभ्रद्वैष्णवपादुकां त्वनघधीर्यो हस्तिनाथाज्ञया
प्राप श्रीवरदाह्वयं नळनभोरोहिण्युडूत्थं सुतम्॥ २२ ॥

योऽश्वाध्यक्षमुखो हरिः पितृदिने विघ्नावहे सेवितः
पुत्रायाखिलशास्त्रदो हरिदिने प्रत्यक्षपद्मापतिः।
सद्रक्षारचितेक्षणैरधरितांभोजैः कटाक्षैरसौ
मन्नित्याभयसूचकैः प्रमददैरार्द्रीकरोत्वद्य माम्॥ २३ ॥

मेयं सम्यगिदं तनोतु मम तन्नेत्राम्बुजं माधव-
स्निग्धं स्वायतमर्थिनामभिमते बद्धादरं सत्कृपम्।
यो रात्रौ कृतपादुकादशशतो रङ्गेशकारुण्यतः
प्रापत्सत्कविवादिपञ्चमुखतां तं प्रार्थ्य निश्शात्रवम्॥ २४ ॥

सङ्गं पापनिवर्तकं नियमयेत्तद्भ्रूयुगं मां सतां
सच्छायं सुमतिप्रियस्य धनुषः स्वीयो रहस्यादिकृत्।

www.prapatti.com

व्याख्याकृच्छठकोपमुख्यवचसां सर्वज्ञसिंहाय स-
    द्राज्ञे तत्त्वहितात्मकानि रचयन्सूक्तानि यः प्राहिणोत्॥ २५ ॥

नित्यं तच्छ्रवणद्वयं निजमनुं ज्ञानाभिवृद्धिप्रदं
    मज्जप्तं सततं शृणोतु मधुरं श्याद्यक्षरज्ञापितम्।
यो रङ्गाद्गुरि शक्तिमङ्गळगतः श्रीलक्ष्मणोपद्रवात्
    दुर्वर्णस्य नतस्य तस्य शुचिताकृत्तीर्थतोऽदात्सुतम्॥ २६ ॥

धत्तां वैष्णवसम्पदं मयि तरां पुण्यं ललाटं गुरो-
    रष्टम्यर्धसुवर्णचन्द्रधवळाकारोर्ध्वपुण्ड्रोज्ज्वलम्।
सेवार्थानुगतोऽथ रङ्गनगरे वीते तुलुष्कैस्सुतौ
    टीकां तस्य सुदर्शनार्यवचसा यः प्राप पूर्वस्थितम्॥ २७ ॥

तां चूडां कविवादिकेसरिगुरोर्ध्यायामि केशैर्वृतां
    वक्त्राम्भोजमधुव्रतैरिव हरेर्मूर्तेः कटाक्षैरिव।
नत्वा यादवगिर्यधीशमपि तं नुत्वा निजस्थानगो
    यो धन्यावकरोत्सुदर्शनसुतौ चोक्त्वाऽभयार्थस्तुतिम्॥ २८ ॥

सम्यग्द्वादशभिस्सुधांशुधवळैरुच्चोर्ध्वपुण्ड्रैर्लसन्
    भातान्मे हृदि वेदमस्तकगुरुर्यज्ञोपवीतोज्ज्वलः।
रङ्गेशं कुरुकाधिपं वृषगिरौ स्थास्नुं च यं गोपणा
    चार्यप्राप्तितमात्तसन्निधिमथ श्रुत्वाऽऽप रङ्गं स्वकैः॥ २९ ॥

दासं मामभिवीक्ष्य भूरि कृपया सन्ताप दुःखच्छिदा
    पापौघाद्विनिवर्तयेत्स मतिदः श्री वेङ्कटेशो गुरुः।
अज्ञातं मतिमानिनां प्रणमतां ज्ञातं रहस्यत्रयी-
    साराख्यं निजनिर्मितं मयि परं ब्रह्माद्य सूल्लासयेत्॥ ३० ॥

हृद्यं स्तोत्रमिदं विधाय निगमान्तार्यस्सदङ्गीकरो-
    त्वानम्रानितरांश्च लक्ष्मणमुखान् रक्षन् कटाक्षैस्तथा।
यस्सौम्योर्जगपूर्णिमातिथिवरे श्रीदिव्यपर्यङ्किका-
    मारुह्यावति चित्तगः प्रणमतोऽद्यार्चात्मना चावनौ॥ ३१ ॥



www.prapatti.com

दिव्यं यत्प्रोक्तदीपं दधुरथ च ददुर्ब्रह्मतन्त्र स्वतन्त्रा-
चार्याद्या यत्सुतोऽपि प्रबलतरमतीन् द्रिक्षु जित्वा कुबुद्धीन्।
काञ्च्यां यं फाल्गुनेऽगाज्जयशरदि तिथौ कृष्णसप्तम्युपेते
सोऽयं वेदान्तसूरिर्जयतु दिशि दिशि भ्राजदात्मीयलक्ष्मीः॥ ३२॥

॥ इति आचार्यद्वात्रिंशत् संपूर्णा॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥



www.prapatti.com